श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीगोदाप्रपत्तिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुजमहादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीगोदाप्रपत्तिः ॥

श्रीभूमिनायकमनोहरदेवि मान्यो
श्रीविष्णुचित्ततनये श्रितकामधेनो।
मातस्समस्तजगतां महनीयकीर्ते
गोदे त्वदीयचरणौ शरणं प्रपद्ये॥ १ ॥

श्रीधन्विनव्यनगरे तुलसीवनान्तः
देवी स्वयं समुदिता जनकात्मजेव।
भूम्यंशतो भुवनपावनि भूसमृद्धे
गोदे त्वदीयचरणौ शरणं प्रपद्ये॥ २ ॥

आरभ्य शैशवमसारतमच्युताङ्घ्रि
भक्त्यै निरस्तविषयान्तरभाववन्द्ये।
श्रीभूसमानुपमदिव्यमहानुभावे
गोदे त्वदीयचरणौ शरणं प्रपद्ये॥ ३ ॥

स्वीयोत्तमाङ्गधृतमाल्यसमर्पणेन
गोदेति नाम वहसि स्वयमच्युताय।
भाग्याधिके परमपूरुष भाग्यलब्धे
गोदे त्वदीयचरणौ शरणं प्रपद्ये॥ ४ ॥

तत्वन्तवेषु धृतमाल्यवरं मुकुन्द
सङ्गृह्य मूर्ध्नि प्रवहन्मुमुदे नितान्तम्।
तत्प्रेमवर्णकसुसुन्दर दिव्यमूर्ते
गोदे त्वदीयचरणौ शरणं प्रपद्ये॥ ५ ॥

श्रीनन्दगोपसुतसुन्दरदिव्यदेह-
भोगाभिलाषकृतपूर्वचरित्रभाषे।
कल्याणि लब्धयदुनन्दन भोगपूर्णे
गोदे त्वदीयचरणौ शरणं प्रपद्ये॥ ६ ॥

श्रीमच्छठारिमुनिशक्तपितृत्वभावे
नाथादियामुनयतीश्वरपूज्यपादे।
शौरे पदाब्जपरभक्तिमतां शरण्यम्
गोदे त्वदीयचरणौ शरणं प्रपद्ये॥ ७ ॥

त्वत् सूक्तिसिद्धममलं परमान्यमग्र्यम्
हैयङ्गवीनमपि सुन्दरबाहवेऽपि।
दातुर्य्यशक्त्युपतिरेवरलं चकर्तु
गोदे त्वदीयचरणौ शरणं प्रपद्ये॥ ८ ॥

प्राबोध्यकीस्तुतिवशीकृतवासुदेवे
पद्मापते प्रथितभाग्यकृतावतारे।
गोपालबालचरितेषु कृतानुरागे
गोदे त्वदीयचरणौ शरणं प्रपद्ये॥ ९ ॥

कारुण्यतूर्णहृदये कमलासहाये
भक्तप्रिये परमपावनवाग्विहारे।
श्रीभट्टनाथकुलमङ्गळदीपरेखे
गोदे त्वदीयचरणौ शरणं प्रपद्ये॥ १० ॥

वज्रारविन्दमकरध्वजशङ्खचक्र-
छत्रादिलाञ्छिततलौ सरसीरुहाभौ।
सर्वाश्रितार्तिहरणे सपदि प्रवीणौ
गोदे त्वदीयचरणौ शरणं प्रपद्ये॥ ११ ॥

सौशील्यकान्तिसमताश्रितवत्सलत्वम्
सौहार्ददान्तमुखसद्गुणराशिपूर्णे।
पुण्ये पुराङ्घ्रिपुरुषोत्तमहृद्यवृत्ते
गोदे त्वदीयचरणौ शरणं प्रपद्ये॥ १२ ॥

॥ इति श्रीगोदाप्रपत्तिः सम्पूर्णा ॥